**दिनाङ्क : 29/06/2025**

**सायम् : 06:20**

**इयम् आकाशवाणी**

**मुख्यवार्ता:**

- **प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् स्वास्थ्यात् सामाजिकसुरक्षापर्यन्तं देशः प्रत्येकस्मिन् क्षेत्रे परिपूर्णतायाः भावनया अग्रेसरति। सः अवदत् यत् एतत् साफल्यं सामाजिकन्यायस्य रमणीयं चित्रमपि प्रस्तौति।**

- **आकाशवाण्या: 'मन की बात' इति कार्यक्रमे प्रधानमन्त्री श्रीमोदी उल्लेखितवान् यत् स्वच्छ-भारत-अभियानम्, जलजीवनमिशन चेत्येतयो: माध्यमेन संजातम् परिवर्तनमालक्ष्य विश्वस्वास्थ्य-संगठनेन ट्रैकोमा-मुक्तं भारतं इति घोषितम्।**

- **प्रधानमन्त्री अवदत् यत् आपत्काले न केवलं संविधानस्य अपितु सामाजिक न्यायस्यापि हननं संजातम्।**

- **ओडिशायाम् अद्य प्रातःकाले पुरी-नगर्याः श्रीगुण्डिचा-मन्दिरस्य समीपे जाते दुर्घटनायां द्वे महिले समेत्य त्रयः भक्ताः मृताः, अन्ये बहवः च घातिताः। राज्यप्रशासनेन प्रत्येकस्य मृतस्य निकटजनानाम् कृते पञ्चविंशतिलक्षरूप्यकाणां अनुग्रहः राशेः घोषणापि कृता।**

- **उत्तराखण्डस्य उत्तरकाशीमण्डले अद्य प्रातः मेघविस्फोटनेन नव श्रमिकाः लुप्ताः सन्ति। तस्मिन् क्षेत्रे सहाय्योद्धारकार्यक्रमाः प्रचलन्ति।**

- **सम्पूर्णदेशे अद्य सामान्य दिवसेभ्यः नव दिनानि पूर्वमेव प्रावृटं समागतम्।**

- **बैडमिण्टन-क्रीडायां भारतस्य उदयमानौ क्रीडकौ आयुष-शेट्टी, तनवीशर्मा च आयोवा-नगरे यूएस ओपन-क्रीडायाः एकल-अन्तिम-क्रीडायां प्रवेशं कृतवन्तौ। ।**

**अथवार्ता: विस्तारेण**

**पीएम-मन की बात**

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् स्वास्थ्यात् सामाजिकसुरक्षापर्यन्तं देशः प्रत्येकस्मिन् क्षेत्रे परिपूर्णतायाः भावनया अग्रेसरति। सः अवदत् यत् वर्तमानकाले भारतस्य अधिकांश जनसंख्याः किञ्चित् सामाजिकसुरक्षायाः लाभं गृह्णाति । अद्य आकाशवाण्याः मन की बात इति कार्यक्रमे स्वविचारं प्रकटयन् श्रीमोदी आईएलओ अर्थात् अन्तर्राष्ट्रीयश्रमसङ्गठनम् इत्यस्य प्रतिवेदनस्य उल्लेखं कृतवान् । यस्मिन् प्रतिपादितम् यत् भारतस्य चतुःषष्टिः प्रतिशतमिताः जनसंख्याः निश्चितरूपेण केषाञ्चन सामाजिकसुरक्षायाः लाभं गृह्णाति ।

प्रधानमन्त्री मोदी उल्लेखः कृतवान् यत् विश्वस्वास्थ्यसङ्गठनेन ट्रैकोमा-मुक्तं भारतं इति घोषितम् । सः उक्तवान् यत् कोटिजनानाम् परिश्रमेण एषः परिणामः समागतः। श्री मोदी उक्तवान् यत् स्वच्छ भारत-अभियानेन अस्य रोगस्य उन्मूलनार्थं साहाय्यं प्राप्तमस्ति तथा च जलजीवनमिशन इत्यनेन अपि एतस्याः सफलतायाः कृते बहु योगदानं प्रदत्तमस्ति। सः अवदत् यत् एषा सफलता सामाजिकन्यायस्य रमणीयं चित्रमपि प्रस्तौति।

प्रधानमन्त्री आपत्कालविषये अवदत् यत् सहभागितायाः शक्तिः बृहत्तमं संकटं अपाकर्तुं शक्नोति । श्री मोदी उक्तवान् यत् कतिपयदिनानि पूर्वं देशे आपात्कालस्य पञ्चशत् वर्षाणि पूर्णानि जातानि सन्ति तथा च देशवासिनः संविधानहननदिवसः आमानितः। सः अवदत् यत् देशः तान् सर्वान् जनान् स्मर्तुं अर्हति, यैः आपत्कालं सम्मुखीकृतवन्तः। यतोहि अनेन ते संविधानं सुदृढं, स्थायीरुपेण च स्थापयितुं प्रेरणां यच्छन्ति। श्री मोदी प्रोक्तवान् यत् तस्मिन् समये बहवः जनेभ्यः यातनाः प्रदत्ताः । छात्राः अपि उत्पीडिताः अभवन् ।

अस्य मासस्य एकविंशतिः दिनाङ्के आयोजितस्य अन्तर्राष्ट्रीययोगदिवसस्य उल्लेखं कुर्वन् श्री मोदी उक्तवान् यत् योगदिवसे देशे विश्वे च कोटिशः जनैः भागं गृहीतवन्तः। सः अवदत् यत् अधुना अधिकाधिकाः जनाः स्वस्य दैनन्दिनजीवने योगं स्वीकुर्वन्ति । प्रधानमन्त्रिणा उक्तं यत् त्रिलक्षजनाः विशाखापत्तनमस्य समुद्रतटे एकत्रीभूय योगं कृतवन्तः। तथा च द्विसहस्राधिकाः आदिवासीछात्राः तत्र अष्टोत्तरैकशत निमेषं यावत्

अष्टोत्तरैकशतवारं सूर्य नमस्कारं कृतवन्तः। प्रधानमन्त्रिणा अपि उक्तं यत् अस्मिन् वर्षे योगस्य विषयः अतीव विशेषः आसीत् यत् एका पृथ्वी, एकः स्वास्थ्यः इति ।

श्री मोदी कैलाश मानसरोवरयात्रा, अमरनाथयात्रा, जगन्नाथ रथयात्रा चेति तीर्थयात्राणां विषये प्रतिपादितवान् । सः अवदत् यत् उत्तरतः दक्षिणं यावत् अपि च पूर्वतः पश्चिमं यावत् एताः यात्राः एकं भारतम्-श्रेष्ठ भारतम् इत्यस्याः भावनायाः प्रतिबिम्बम् अस्ति। सः प्रकाशितवान् यत् एताः धार्मिकयात्राः अपि सेवाभावनायाः कृते महान् अवसरः अस्ति ।

**तेलं□ ाना - अमित शाह**

केन्द्रीयगृहमन्त्री अमितशाहः अद्य तेलङ्गानाराज्यस्य निजामाबादनगरे राष्ट्रियहल्दीमण्डलस्य मुख्यालयस्य औपचारिकम् उद्घाटनं कृतवान्। अस्मिन् अवसरे प्रवदन् श्रीशाहः अवदत् यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना हरिद्रा कृषकाणां चत्वारिंशत् वर्षीयं स्वप्नं निजामाबादे राष्ट्रियहल्दीमण्डलस्य स्थापनं कृत्य पूर्णं कृतवान्।

**पुरी- दुर्घटना**

ओडिशायाम् अद्य प्रातःकाले पुरी-नगर्याः साराधाबली-नगरस्य श्रीगुण्डिचा-मन्दिरस्य समीपे जाते दुर्घटनायां द्वे महिले समेत्य त्रयः भक्ताः मृताः, अन्ये बहवः च घातिताः। भगवतः जगन्नाथस्य, भगवतः बलभद्रस्य, देवीसुभद्रायाः च रथानां दर्शनाय विशालः जनसमूहः यदा समागतः आसीत् तदा एषा दुर्घटना जाता । व्रणिता: जना: समीपस्थेषु चिकित्सालये प्रविष्टाः सन्ति। ओडिशा-राज्यस्य मुख्यमन्त्रिणा मोहनचरण माझी इत्यनेन भक्तानां निधने गभीरं शोकं प्रकटितं, भगवतः जगन्नाथस्य लक्षशः भक्तानां कृते अस्य दुर्भाग्यपूर्णघटनायाः कृते क्षमायाचनापि कृता। सः अवदत् यत् तस्य प्रशासनं भक्तानां सुरक्षां प्रति प्रमादं न सहते। राज्यप्रशासनेन प्रत्येकस्य मृतस्य निकटजनानाम् कृते पञ्चविंशतिलक्षरूप्यकाणां अनुग्रहः राशेः घोषणापि कृता।

**मेघविस्फोटः-उत्तराखण्डः-**

उत्तराखण्डस्य उत्तरकाशीमण्डले अद्य प्रातः मेघविस्फोटनेन नव श्रमिकाः लुप्ताः सन्ति। तस्मिन् क्षेत्रे सहाय्योद्धारकार्यक्रमाः प्रचलन्ति। राज्ये सर्वत्र प्रचण्डवृष्ट्याः कारणात् चारधामयात्रा एकदिवसाय स्थगितम्। गतरात्रौ प्रचण्डवृष्ट्या उत्तराखण्डस्य अनेकेषु भागेषु सामान्यजीवनं बाधितं जातम्। उत्तरकाशीमण्डलस्य सिलाईक्षेत्रे मेघविस्फोटनानन्तरम् उद्धारकार्यक्रमाः प्रचलन्ति, यस्मिन् नेपालीमूलस्य नव श्रमिकाः लुप्ताः। वर्षायाः कारणेन गङ्गोत्री, यमुनोत्री च राष्ट्रियराजमार्गौ अवरुद्धाः इति जनपदाधिकारी सूचितवान्।

## **<u>देशे प्रावृटस्या□ नम</u>□**

देशे अद्य  सामान्य दिवसेभ्यः नव  दिनानि पूर्वमेव प्रावृटं समागतमस्ति। झारखंड, ओडिशा, बिहार, मध्यप्रदेश, छत्तीसगढ़, हिमाचल-प्रदेश, उत्तराखंड, उत्तर-प्रदेश, गोवा, गुजरात चेति राज्यानां समेत्य  पूर्वोत्तर-भारतस्य नैकेषु क्षेत्रेषु आगामिषु सप्त दिवसेषु तीव्र वृष्टेः संभावना वर्तते । आकाशवाण्या सह परिचर्चां कुर्वन् भारतीय ऋतु विज्ञान विभागस्य महानिदेशकः डॉ. मृत्युंजय महापात्रःप्रतिपादितवान् यत्  दक्षिण-पश्चवर्ती प्रावृट्  देशस्य विविधेषु क्षेत्रेषु सम्प्राप्तः।  डॉ. महापात्रः प्रतिपादितवान् यत् आगामि दिवसद्वयं यावत्  मध्य-भारते, उत्तर-पश्चिम भारते च  तीव्र वृष्टेः संभावना वर्तते । श्री महापात्रेण एतदपि उक्तं यत् प्रावृट्  राजधान्यां  दिल्ल्यां अपि समागतः। तत्र आगामि दिवसद्वयं यावत् अल्प वृष्टेः संभावना वर्तते ।

## **<u>बैडमिण्टन</u>□**

बैडमिण्टन्-क्रीडायां भारतस्य उदयमानाः क्रीडकौ आयुष-शेट्टी, तनवीशर्मा च आयोवा-नगरे यूएस ओपन-क्रीडायाः एकल-अन्तिम-क्रीडायां प्रवेशं कृतवन्तौ। पुरुष एकलस्पर्धायां विंशति वयोवर्षीयः आयुषः ताइवानस्य चोउ टीएन्-चेन् इत्यमुं पराजित्य प्रथमवारं अन्तिमचक्रे प्रविष्टवान्।

**।। इति वार्ताः ।।**